# Shivakritam 1 Vishnu Stotram

# शिवकृतं १ विष्णुस्तोत्रम्

## Document Information

Text title : Shivakritam 1 Vishnu Stotram

File name : shivakRRitaM1viShNustotram.itx

Category : vishhnu, vishnu, vAmanapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : vAmanapurANa | adhyAya 3/14-23||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2024

*sanskritdocuments.org*

# शिवकृतं १ विष्णुस्तोत्रम्

हर उवाच ।
नमस्ते देवतानाथ नमस्ते गरुडध्वज ।
शङ्खचक्रगदापाणे वासुदेव नमोऽस्तु ते ॥ ३-१४॥

नमस्ते निर्गुणानन्त अप्रतर्क्याय वेधसे ।
ज्ञानाज्ञाननिरालम्ब सर्वालम्ब नमोऽस्तु ते ॥ ३-१५॥

रजोयुक्त नमस्तेऽस्तु ब्रह्ममूर्ते सनातन ।
त्वया सर्वमिदं नाथ जगत्सृष्टं चराचरम् ॥ ३-१६॥

सत्त्वाधिष्ठित लोकेश विष्णुमूर्ते अधोक्षज ।
प्रजापाल महाबाहो जनार्दन नमोऽस्तु ते ॥ ३-१७॥

तमोमूर्ते अहं ह्येष त्वदंशक्रोधसम्भवः ।
गुणाभियुक्त देवेश सर्वव्यापिन् नमोऽस्तु ते ॥ ३-१८॥

भूरियं त्वं जगन्नाथ जलाम्बरहुताशनः ।
वायुर्बुद्धिर्मनश्चापि शर्वरी त्वं नमोऽस्तु ते ॥ ३-१९॥

धर्मो यज्ञस्तपःसत्यमहिंसा शौचमार्जवम् ।
क्षमा दानं दया लक्ष्मीर्ब्रह्मचर्यं त्वमीश्वर ॥ ३-२०॥

त्वं साङ्गाश्चतुरो वेदास्त्वं वेद्यो वेदपारगः ।
उपवेदा भवानीश सर्वोऽसि त्वं नमोऽस्तु ते ॥ ३-२१॥

नमो नमस्तेऽच्युत चक्रपाणे नमोऽस्तु ते माधव मीनमूर्ते ।
लोके भवान् कारुणिको मतो मे त्रायस्व मां केशव पापबन्धात् ॥ ३-२२॥

ममाशुभं नाशय विग्रहस्थं यद्ब्रह्महत्याऽभिभवं बभूव ।
दग्धोऽस्मि नष्टोऽस्म्यसमीक्ष्यकारी पुनीहि तीर्थोऽसि नमो नमस्ते ॥ ३-२३॥

इति वामनपुराणे तृतीयाध्यायान्तर्गतं

शिवकृतं विष्णुस्तोत्रं समाप्तम् ।

वामनपुराण । अध्याय ३/१४-२३ ॥

vAmanapurANa . adhyAya 3/14-23..

Proofread by PSA Easwaran

---

*Shivakritam 1 Vishnu Stotram*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*